# Maharshibhishcha Kritam Vishnu Stotram

# महर्षिभिश्च कृतं विष्णुस्तोत्रम्

## Document Information

Text title : Maharshibhishcha Kritam Vishnu Stotram

File name : maharShibhishchakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, vAmanapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : vAmanapurANa | adhyAya 89/36-41||

Latest update : September 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 27, 2024

*sanskritdocuments.org*

# महर्षिभिश्च कृतं विष्णुस्तोत्रम्

ब्रह्मादय ऊचुः ।
तं जातमात्रं भगवन्तमीशं नारायणं लोकपतिं पुराणम् ।
ब्रह्मा समभ्येत्य समं महर्षिभिः स्तोत्रं जगादाथ विभोर्महर्षे ॥ ३५॥

नमोऽस्तु ते माधव सत्त्वमूर्त्ते नमोऽस्तु ते शाश्वत विश्वरूप ।
नमोऽस्तु ते शत्रुवनेन्धनाग्ने नमोऽस्तु वै पापमहादवाग्ने ॥ ३६॥

नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्ते जगदाधार नमस्ते पुरुषोत्तम ॥ ३७॥

नारायण जगन्मूर्ते जगन्नाथ गदाधर ।
पीतवासः श्रियः कान्त जनार्दन नमोऽस्तु ते ॥ ३८॥

भवांस्त्राता च गोप्ता च विश्वात्मा सर्वगो ।
अव्ययः ।
सर्वधारी धराधारी रूपधारी नमोऽस्तु ते ॥ ३९॥

वर्धस्व वर्धिताशेषत्रैलोक्य सुरपूजित ।
कुरुष्व दैवतपते मघोनोऽश्रुप्रमार्जनम् ॥ ४०॥

त्वं धाता च विधाता च संहर्ता त्वं महेश्वरः ।
महालय महायोगिन् योगशायिन् नमोऽस्तु ते ॥ ४१॥

इत्थं स्तुतो जगन्नाथं सर्वात्मा सर्वगो हरिः ।
प्रोवाच भगवान् मह्यं कुरूपनयनं विभो ॥ ४२॥

इति वामनपुराणे एकोननवतितमाध्यायान्तर्गतं वामनप्रादुर्भावे ब्रह्मणा महर्षिभिश्च कृतं विष्णुस्तोत्रं समाप्तम् ।

वामनपुराण । अध्याय ८९/३६-४१ ॥

vAmanapurANa . adhyAya 89/36-41..

Proofread by PSA Easwaran

*Maharshibhishcha Kritam Vishnu Stotram*

pdf was typeset on September 27, 2024

Please send corrections to *sanskrit@cheerful.com*